योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः १०५

पञ्चाधिकशततमः सर्गः १०५

शिखिध्वज उवाच ।

एवं स्थिते महाभाग कथमुद्वेगमीदृशम् ।

लब्धवानसि देवोऽपि वद वेद्यविदां वर ।।१

कुम्भ उवाच ।

श्रृणु कार्यमिदं चित्तं मदीयं वसुधाधिप ।

कथयामि तवाशेषं सर्गे यद्वृत्तमद्य मे ।। २

सुहृद्यावेदितं दुःखं परमायाति तानवम् ।

घनं जडं कृष्णमपि मुक्तवृष्टिरिवाम्बुदः ।। ३

सुहृदा पृच्छता साधु चेतो याति प्रसन्नताम् ।

स्वच्छतोपगतेनाशु कतकेन जलं यथा ।। ४

अहं तावदितो यातो भवते पुष्पमञ्जरीम् ।

दत्त्वा गगनमुल्लङ्घ्य संप्राप्तश्च त्रिविष्टपम् ।। ५

ततः पित्रा महेन्द्रस्य सभास्थाने यथाक्रमम् ।

स्थित्वोत्थाय तथोत्थानकाले पित्रा विवर्जितः ।। ६

इहागन्तुमहं त्यक्त्वा स्वर्गं संप्राप्तवान्नभः ।

दिवाकरहयैः सार्धं वहाम्यनिलवर्त्मनि ।। ७

अथैकत्र गतो भानुरेकेनान्येन वर्त्मना ।

आगच्छाम्यहमाकाशं सागरापतिताकृतिः ।। ८

अथाग्रे वारिपूर्णानां मेघानां मध्यवर्त्मना ।

अपश्यं मुनिमायान्तमहं दुर्वाससं जवात् ।। ९

पयोधरपटच्छन्नं विद्युद्वलयभूऽषितम् ।
अभिसारिकया तुल्यं धाराधौताङ्गचन्दनम् ।। १०
स्थितां सुतरुसुच्छायामापगां वसुधातले ।
वेगेनाभिसरन्तं तां तपोलक्ष्मीमिव प्रियाम् ।। ११
तस्य कृत्वा नमस्कारमुक्तं खे वहता मया ।
मुने नीलाभ्रवस्त्रस्त्वमभिसारिकया समः ।। १२
इत्याकर्ण्य मुमोचासौ मयि मानद शापकम् ।
स्तनकेशवती कान्ता हावभावविलासिनी ।। १३
गच्छानेन दुरुक्तेन रात्रौ योषा भविष्यसि ।

इति श्रुत्वाऽशुभं वाक्यमुत्थितं जर्जरद्विजात् ।। १४
विमृशामि मनाग्यावत्तावदन्तर्हितो मुनिः ।
इत्युद्वेगमनाः साधो संप्राप्तोऽहं नभस्तलात् ।। १५
एतत्ते कथितं सर्वं संपन्नोऽस्मि निशाङ्गना ।
अतिवाह्यं दिनान्तेषु स्त्रीत्वमेतन्मया कथम् ।। १६
योषित्स्तनवती रात्रौ वक्तव्यं किं मया पितुः ।
संसृतौ भवितव्यानामहो नु विषमा गतिः ।। १७
अहमप्यद्य यद्दैवाद्यूनामामिषतां गतः ।
कष्टं मदपहारेण कलहो जायतेऽधुना ।। १८
दिवि देवकुमाराणां कामाकुलधियामिह ।
गुरुदेवद्विजातीनां लज्जापरवशात्मना ।। १९
कथमग्रे मया सम्यग्वस्तव्यं यामिनीस्त्रिया ।
श्रीवसिष्ठ उवाच ।
इत्युक्त्वा क्षणमेकं सा तूष्णीं स्थित्वा मुनिस्थितौ ।। २०
धैर्यमाश्रित्य कुम्भोऽत्र पुनराह रघूद्वह ।
किमज्ञ इव शोचामि किं मम क्षतमात्मनः ।। २१

यथागतमयं देहो मत्तोऽन्योऽनुभविष्यति ।

शिखिध्वज उवाच ।

परिदेवनया कोऽर्थो देवपुत्र तथैतया ।। २२

यदायाति तदायातु देहस्यात्मा न लिप्यते ।

कानिचिद्यानि दुःखानि सुखानि विहितानि च ।। २३

तानि सर्वाणि देहस्य देहिनो न तु कानिचित् ।

यदि त्वमपि कार्याणामखेदार्होऽपि खिद्यसे ।। २४

तदन्येषामुपायः स्यात्क इवागमभूषणः ।

खेदे खेदोचितं वाच्यमिति किंचित्त्वमुक्तवान् ।।२५

इदानीं समतामेत्य तिष्ठाखिन्नो यथास्थितम् ।

श्रीवसिष्ठ उवाच ।

तावेवमादिभिर्वाक्यैरन्योन्याश्वासनं स्वयम् ।। २६

कृत्वा स्थितौ वनस्निग्धौ सुहृदौ खेदिनौ मिथः ।

अथार्कोऽप्यस्य कुम्भस्य स्त्रीत्वमुत्पादयन्निव ।। २७

जगामास्तं जगद्दीपो दीपः स्नेहक्षयादिव ।

व्यवहारभरैः सार्धं पद्माः संकोचमाययुः ।। २८

मार्गाश्च पथिकैः सार्धं पान्थस्त्रीहृदयानि च ।

दाशवद्विहगान्सर्वान्कुर्वदेकत्र संचितान् ।। २९

तारकारत्नजालाढ्यं भुवने साम्यतां ययौ ।

खं हसदिव ताराढ्यं विकासिकुमुदाकरम् ।। ३०

ययावुन्नादचक्राह्वभ्रमद्भ्रमरपेटकम् ।

सुहृदौ तावथोत्थाय संध्यामुद्यन्निशाकराम् ।। ३१

वन्दयित्वा तथा कृत्वा जप्यं गुल्मान्तरे स्थितौ ।

ततः कुम्भः शनैस्तत्र स्त्रैणमभ्याहरन्वपुः ।। ३२

शिखिध्वजं पुरःसंस्थं प्रोवाच गलदक्षरम् ।

पतामीव स्फुरामीव द्रवामीवाङ्गयष्टिभिः ।। ३३

लज्जयैव च ते राजन्मन्ये स्त्रीत्वं व्रजाम्यहम् ।

पश्येमे परिवर्धन्ते राजन्मम शिरोरुहाः ।। ३४

प्रस्फुरत्तारकामाला दिनान्ततिमिरा इव ।

पश्येमौ मम जायेते प्रोन्मुखावुरसि स्तनौ ।। ३५

कोरकाविव पद्मिन्या वसन्ते गगनोन्मुखौ ।

आगुल्फमेव लम्बानि संपद्यन्तेऽम्बराणि मे ।। ३६

देहादेव सखे पश्य स्त्रिया इव शनैः शनैः ।

भूषणान्युत रत्नानि माल्यानि विविधानि च ।। ३७

पश्येमान्यङ्ग जायन्ते स्वाङ्गेभ्यो वृक्षपुष्पवत् ।

पश्यायं स्वयमेवाद्य चन्द्रांशुकरशोभनः ।। ३८

मूर्ध्नि पट्टांशुको जातो नीहारोऽद्राविवाङ्ग मे ।

सर्वाणि कान्तालिङ्गानि जातानि मम मानद ।। ३९

हा धिक्कष्टं विषादो मे किं करोम्यङ्गनास्म्यहम् ।

हा धिक्कष्टमहो साधो स्थित एवाहमङ्गना ।। ४०

संविदानुभवाम्यन्तर्नितम्बजघने त्विमे ।

विपिने कुम्भ इत्युक्त्वा तूष्णीं खिन्नो बभूव ह ।।४१

राजापि च तमालोक्य तथैवासीद्विषण्णधीः ।

मुहूर्तमात्रेणोवाच शिखिध्वज इदं वचः ।। ४२

कष्टं सोऽयं महासत्त्वः संपन्ना वरवर्णिनी ।

साधो विदितवेद्यस्त्वं जानासि नियतेर्गतिम् ।। ४३

अवश्यभाविन्यर्थेऽस्मिन्मा खिन्नहृदयो भव ।

आपतन्ति दशास्तास्ताः सुधियां देहमात्रके ।। ४४

न चेतस्यधियां त्वेताश्चित्तं यान्ति न देहकम् ।

कुम्भ उवाच ।

एवमस्त्वनुतिष्ठामि यामिनीस्त्रीत्वमात्मनः ।। ४५

न खेदमनुगच्छामि नियतिः केन लङ्घ्यते ।

इति निर्णीय तौ खेदं तं नीत्वा तनुतामिव ।। ४५

एकतल्पे निशां तूष्णीं नीतवन्तौ चिरेण ताम् ।

अथ प्रभाते तत्स्त्रैणं वपुरुत्सृज्य यौवनम् ।। ४७

बभूव कुम्भः कुम्भाभः कुचप्रोज्झितमूर्तिमान् ।

इति सा राजमहिषी चूडाला वरवर्णिनी ।। ४८

कुम्भत्वमास्थिता भर्तुः पश्चात्स्त्रीत्वमुपागता ।

विजहार वनान्तेषु कुमारीधर्मिणी निशि ।

कुम्भरूपधरा चाह्नि भर्त्रा मित्रेण संयुता ।। ४९

कैलासमन्दरमहेन्द्रसुमेरुसह्य-

सानुष्वविस्खलितयोगगमागमा सा ।

साकं प्रियेण सुहृदा भवता यथेच्छं

स्रग्दामहारवलिता विजहार नारी ।। ५०

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० निर्वाणप्रकरणे पू० चू० कुम्भस्य स्त्रीत्वलाभो नाम

पञ्चाधिकशततमः सर्गः ।। १०५।।